# ॐ श्री परमात्मने नमः। अथ एकादशोऽध्यायः। विश्वरूपदर्शनयोगः।

| | |
|---|---|
| अर्जुन उवाच<br>मदनुग्रहाय परमम् गुह्यमध्यात्मसंज्ञितम्।<br>यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥ १॥ | अर्जुन उवाच<br>पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्।<br>ब्रह्माणमीशं कमलासनस्थम् ऋषींश्च सर्वानुरगांश्च दिव्यान्॥ १५॥ |
| भवाप्ययौ हि भूतानाम् श्रुतौ विस्तरशो मया।<br>त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥ २॥ | अनेकबाहूदरवक्त्रनेत्रम् पश्यामि त्वां सर्वतोऽनन्तरूपम्।<br>नान्तं न मध्यं न पुनस्तवादिम् पश्यामि विश्वेश्वर विश्वरूप॥ १६॥ |
| एवमेतद्यथात्थ त्वम् आत्मानं परमेश्वर।<br>द्रष्टुमिच्छामि ते रूपम् ऐश्वरं पुरुषोत्तम॥ ३॥ | किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।<br>पश्यामि त्वां दुर्निरीक्ष्यं समन्तात् दीप्तानलार्कद्युतिमप्रमेयम्॥ १७॥ |
| मन्यसे यदि तच्छक्यम् मया द्रष्टुमिति प्रभो।<br>योगेश्वर ततो मे त्वम् दर्शयात्मानमव्ययम्॥ ४॥ | त्वमक्षरं परमं वेदितव्यम् त्वमस्य विश्वस्य परं निधानम्।<br>त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे॥ १८॥ |
| श्रीभगवानुवाच<br>पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।<br>नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥ ५॥ | अनादिमध्यान्तमनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रम्।<br>पश्यामि त्वां दीप्तहुताशवक्त्रम् स्वतेजसा विश्वमिदं तपन्तम्॥ १९॥ |
| पश्यादित्यान् वसून् रुद्रान् अश्विनौ मरुतस्तथा।<br>बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥ ६॥ | द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।<br>दृष्ट्वाद्भुतं रूपमुग्रं तवेदम् लोकत्रयं प्रव्यथितं महात्मन्॥ २०॥ |
| इहैकस्थं जगत्कृत्स्नम् पश्याद्य सचराचरम्।<br>मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥ ७॥ | अमी हि त्वां सुरसंघा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति।<br>स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥ २१॥ |
| न तु मां शक्यसे द्रष्टुम् अनेनैव स्वचक्षुषा।<br>दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥ ८॥ | रुद्रादित्या वसवो ये च साध्याः विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।<br>गन्धर्वयक्षासुरसिद्धसंघाः वीक्षन्ते त्वां विस्मिताश्चैव सर्वे॥ २२॥ |
| सञ्जय उवाच<br>एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः।<br>दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ ९॥ | रूपं महत्ते बहुवक्त्रनेत्रम् महाबाहो बहुबाहूरुपादम्।<br>बहूदरं बहुदंष्ट्राकरालम् दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्॥ २३॥ |
| अनेकवक्त्रनयनम् अनेकाद्भुत दर्शनम्।<br>अनेकदिव्याभरणम् दिव्यानेकोद्यतायुधम्॥ १०॥ | नभःस्पृशं दीप्तमनेकवर्णम् व्यात्ताननं दीप्तविशालनेत्रम्।<br>दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो॥ २४॥ |
| दिव्यमाल्याम्बरधरम् दिव्यगन्धानुलेपनम्।<br>सर्वाश्चर्यमयं देवम् अनन्तं विश्वतोमुखम्॥ ११॥ | दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।<br>दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास॥ २५॥ |
| दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।<br>यदि भाः सदृशी सा स्यात् भासस्तस्य महात्मनः॥ १२॥ | अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः।<br>भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः॥ २६॥ |
| तत्रैकस्थं जगत्कृत्स्नम् प्रविभक्तमनेकधा।<br>अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥ १३॥ | वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।<br>केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥ २७॥ |
| ततः स विस्मयाविष्टः हृष्टरोमा धनञ्जयः।<br>प्रणम्य शिरसा देवम् कृताञ्जलिरभाषत॥ १४॥ | यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।<br>तथा तवामी नरलोकवीराः विशन्ति वक्त्राण्यभिविज्वलन्ति॥ २८॥ |

यथा प्रदीप्तं ज्वलनं पतंगाः विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोकाः तवापि वक्त्राणि समृद्धवेगाः॥ २९॥

लेलिह्यसे ग्रसमानः समन्तात् लोकान्समग्रान्वदनैर्ज्वलद्भिः।
तेजोभिरापूर्य जगत्समग्रम् भासस्तवोग्राः प्रतपन्ति विष्णो॥ ३०॥

आख्याहि मे को भवानुग्ररूपः नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यम् न हि प्रजानामि तव प्रवृत्तिम्॥ ३१॥

श्रीभगवानुवाच

कालोऽस्मि लोकक्षयकृत्प्रवृद्धः लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥ ३२॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान्॥ ३४॥

सञ्जय उवाच

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णम् सगद्गदं भीतभीतः प्रणम्य॥ ३५॥

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः॥ ३६॥

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्॥ ३७॥

त्वमादिदेवः पुरुषः पुराणः त्वमस्य विश्वस्य परं निधानम्।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप॥ ३८॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते॥ ३९॥

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वम् सर्वं समाप्नोषि ततोऽसि सर्वः॥ ४०॥

सखेति मत्वा प्रसभं यदुक्तम् हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदम् मया प्रमादात् प्रणयेन वापि॥ ४१॥

यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।
एकोऽथवाप्यच्युततत्समक्षम् तत् क्षामये त्वामहमप्रमेयम्॥ ४२॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः लोकत्रयेऽप्यप्रतिमप्रभाव॥ ४३॥

तस्मात् प्रणम्य प्रणिधाय कायम् प्रसादयेत्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्॥ ४४॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।
तदेव मे दर्शय देव रूपम् प्रसीद देवेश जगन्निवास॥ ४५॥

किरीटिनं गदिनं चक्रहस्तम् इच्छामि त्वां द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥ ४६॥

श्रीभगवानुवाच

मया प्रसन्नेन तवार्जुनेदम् रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यम् यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ४७॥

न वेदयज्ञाध्ययनैर्न दानैः न च क्रियाभिर्न तपोभिरुग्रैः।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥ ४८॥

मा ते व्यथा मा च विमूढभावः दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वम् तदेव मे रूपमिदं प्रपश्य॥ ४९॥

सञ्जय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनम् भूत्वा पुनः सौम्यवपुर्महात्मा॥ ५०॥

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपम् तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥ ५१॥

श्रीभगवानुवाच

सुदुर्दर्शमिदं रूपम् दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥ ५२॥

नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुम् दृष्टवानसि मां यथा॥ ५३॥

भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप॥ ५४॥

मत्कर्मकृन्मत्परमः मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥ ५५॥

*ॐ तत्सदिति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे*
*श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नाम एकादशोऽध्यायः॥*

# om śrī paramātmane namaḥ. atha ekādaśo'dhyāyaḥ. viśvarūpadarśanayogaḥ.

arjuna uvāca
madanugrahāya paramam
guhyamadhyātmasaṁjñitam
yattvayoktaṁ vacastena
moho'yaṁ vigato mama 1

bhavāpyayau hi bhūtānām
śrutau vistaraśo mayā
tvattaḥ kamalapatrākṣa
māhātmyamapi cāvyayam 2

evametadyathāttha tvam
ātmānaṁ parameśvara
draṣṭumicchāmi te rūpam
aiśvaraṁ puruṣottama 3

manyase yadi tacchakyam
mayā draṣṭumiti prabho
yogeśvara tato me tvam
darśayātmānamavyayam 4

śrībhagavānuvāca
paśya me pārtha rūpāṇi
śataśo'tha sahasraśaḥ
nānāvidhāni divyāni
nānāvarṇākṛtīni ca 5

paśyādityān vasūn rudrān
aśvinau marutastathā
bahūnyadṛṣṭapūrvāṇi
paśyāścaryāṇi bhārata 6

ihaikasthaṁ jagatkṛtsnam
paśyādya sacarācaram
mama dehe guḍākeśa
yaccānyaddraṣṭumicchasi 7

na tu māṁ śakyase draṣṭum
anenaiva svacakṣuṣā
divyaṁ dadāmi te cakṣuḥ
paśya me yogamaiśvaram 8

sañjaya uvāca
evamuktvā tato rājan
mahāyogeśvaro hariḥ
darśayāmāsa pārthāya
paramaṁ rūpamaiśvaram 9

anekavaktranayanam
anekādbhuta darśanam
anekadivyābharaṇam
divyānekodyatāyudham 10

divyamālyāmbaradharam
divyagandhānulepanam
sarvāścaryamayaṁ devam
anantaṁ viśvatomukham 11

divi sūryasahasrasya
bhavedyugapadutthitā
yadi bhāḥ sadṛśī sā syāt
bhāsastasya mahātmanaḥ 12

tatraikasthaṁ jagatkṛtsnam
pravibhaktamanekadhā
apaśyaddevadevasya
śarīre pāṇḍavastadā 13

tataḥ sa vismayāviṣṭaḥ
hṛṣṭaromā dhanañjayaḥ
praṇamya śirasā devam
kṛtāñjalirabhāṣata 14

arjuna uvāca
paśyāmi devāṁstava deva dehe
sarvāṁstathā bhūtaviśeṣasaṁghān
brahmāṇamīśaṁ kamalāsanastham
ṛṣīṁśca sarvānuragāṁśca divyān 15

anekabāhūdaravaktranetram
paśyāmi tvāṁ sarvato'nantarūpam
nāntaṁ na madhyaṁ na punastavādim
paśyāmi viśveśvara viśvarūpa 16

kirīṭinaṁ gadinaṁ cakriṇaṁ ca
tejorāśiṁ sarvato dīptimantam
paśyāmi tvāṁ durnirīkṣyaṁ samantāt
dīptānalārkadyutimaprameyam 17

tvamakṣaraṁ paramaṁ veditavyam
tvamasya viśvasya paraṁ nidhānam
tvamavyayaḥ śāśvatadharmagoptā
sanātanastvaṁ puruṣo mato me 18

anādimadhyāntamanantavīryam
anantabāhuṁ śaśisūryanetram
paśyāmi tvāṁ dīptahutāśavaktram
svatejasā viśvamidaṁ tapantam 19

dyāvāpṛthivyoridamantaraṁ hi
vyāptaṁ tvayaikena diśaśca sarvāḥ
dṛṣṭvādbhutaṁ rūpamugraṁ tavedam
lokatrayaṁ pravyathitaṁ mahātman 20

amī hi tvāṁ surasaṁghā viśanti
kecidbhītāḥ prāñjalayo gṛṇanti
svastītyuktvā maharṣisiddhasaṁghāḥ
stuvanti tvāṁ stutibhiḥ puṣkalābhiḥ 21

rudrādityā vasavo ye ca sādhyāḥ
viśve'śvinau marutaścoṣmapāśca
gandharvayakṣāsurasiddhasaṁghāḥ
vīkṣante tvāṁ vismitāścaiva sarve 22

rūpaṁ mahatte bahuvaktranetram
mahābāho bahubāhūrupādam
bahūdaraṁ bahudaṁṣṭrākarālam
dṛṣṭvā lokāḥ pravyathitāstathāham 23

nabhaḥspṛśaṁ dīptamanekavarṇam
vyāttānanaṁ dīptaviśālanetram
dṛṣṭvā hi tvāṁ pravyathitāntarātmā
dhṛtiṁ na vindāmi śamaṁ ca viṣṇo 24

daṁṣṭrākarālāni ca te mukhāni
dṛṣṭvaiva kālānalasannibhāni
diśo na jāne na labhe ca śarma
prasīda deveśa jagannivāsa 25

amī ca tvāṁ dhṛtarāṣṭrasya putrāḥ
sarve sahaivāvanipālasaṁghaiḥ
bhīṣmo droṇaḥ sūtaputrastathāsau
sahāsmadīyairapi yodhamukhyaiḥ 26

vaktrāṇi te tvaramāṇā viśanti
daṁṣṭrākarālāni bhayānakāni
kecidvilagnā daśanāntareṣu
saṁdṛśyante cūrṇitairuttamāṅgaiḥ 27

yathā nadīnāṁ bahavo'mbuvegāḥ
samudramevābhimukhā dravanti
tathā tavāmī naralokavīrāḥ
viśanti vaktrāṇyabhivijvalanti 28

yathā pradīptaṁ jvalanaṁ pataṁgāḥ
viśanti nāśāya samṛddhavegāḥ
tathaiva nāśāya viśanti lokāḥ
tavāpi vaktrāṇi samṛddhavegāḥ 29

lelihyase grasamānaḥ samantāt
lokānsamagrānvadanairjvaladbhiḥ
tejobhirāpūrya jagatsamagram
bhāsastavograḥ pratapanti viṣṇo 30

ākhyāhi me ko bhavānugrarūpaḥ
namo'stu te devavara prasīda
vijñātumicchāmi bhavantamādyam
na hi prajānāmi tava pravṛttim 31

śrībhagavānuvāca
kālo'smi lokakṣayakṛtpravṛddhaḥ
lokān samāhartumiha pravṛttaḥ
ṛte'pi tvāṁ na bhaviṣyanti sarve
ye'vasthitāḥ pratyanīkeṣu yodhāḥ 32

tasmāttvamuttiṣṭha yaśo labhasva
jitvā śatrūn bhuṅkṣva rājyaṁ samṛddham
mayaivaite nihatāḥ pūrvameva
nimittamātraṁ bhava savyasācin 33

droṇaṁca bhīṣmaṁca jayadrathaṁca
karṇaṁ tathānyānapi yodhavīrān
mayā hatāṁstvaṁ jahi mā vyathiṣṭhāḥ
yudhyasva jetāsi raṇe sapatnān 34

sañjaya uvāca
etacchrutvā vacanaṁ keśavasya
kṛtāñjalirvepamānaḥ kirīṭī
namaskṛtvā bhūya evāha kṛṣṇam
sagadgadaṁ bhītabhītaḥ praṇamya 35

arjuna uvāca
sthāne hṛṣīkeśa tava prakīrtyā
jagat prahṛṣyatyanurajyate ca
rakṣāṁsi bhītāni diśo dravanti
sarve namasyantica siddhasaṁghāḥ 36

kasmācca te na nameranmahātman
garīyase brahmaṇo'pyādikartre
ananta deveśa jagannivāsa
tvamakṣaraṁ sadasattatparaṁ yat 37

tvamādidevaḥ puruṣaḥ purāṇaḥ
tvamasya viśvasya paraṁ nidhānam
vettāsi vedyaṁ ca paraṁ ca dhāma
tvayā tataṁ viśvamanantarūpa 38

vāyuryamo'gnirvaruṇaḥ śaśāṅkaḥ
prajāpatistvaṁ prapitāmahaśca
namo namaste'stu sahasrakṛtvaḥ
punaśca bhūyo'pi namo namaste 39

namaḥ purastādatha pṛṣṭhataste
namo'stu te sarvata eva sarva
anantavīryāmitavikramastvam
sarvaṁ samāpnoṣi tato'si sarvaḥ 40

sakheti matvā prasabhaṁ yaduktam
he kṛṣṇa he yādava he sakheti
ajānatā mahimānaṁ tavedam
mayā pramādāt praṇayena vāpi 41

yaccāvahāsārthamasatkṛto'si
vihāraśayyāsanabhojaneṣu
eko'thavāpyacyutatatsamakṣam
tat kṣāmaye tvāmahamaprameyam 42

pitāsi lokasya carācarasya
tvamasya pūjyaśca gururgarīyān
na tvatsamo'styabhyadhikaḥ kuto'nyaḥ
lokatraye'pyapratimaprabhāva 43

tasmāt praṇamya praṇidhāya kāyam
prasādayetvāmahamīśamīḍyam
piteva putrasya sakheva sakhyuḥ
priyaḥ priyāyārhasi deva soḍhum 44

adṛṣṭapūrvaṁ hṛṣito'smi dṛṣṭvā
bhayena ca pravyathitaṁ mano me
tadeva me darśaya deva rūpam
prasīda deveśa jagannivāsa 45

kirīṭinaṁ gadinaṁ cakrahastam
icchāmi tvāṁ draṣṭumahaṁ tathaiva
tenaiva rūpeṇa caturbhujena
sahasrabāho bhava viśvamūrte 46

śrībhagavānuvāca
mayā prasannena tavārjunedam
rūpaṁ paraṁ darśitamātmayogāt
tejomayaṁ viśvamanantamādyam
yanme tvadanyena na dṛṣṭapūrvam 47

na vedayajñādhyayanairna dānaiḥ
na ca kriyābhirna tapobhirugraiḥ
evaṁrūpaḥ śakya ahaṁ nṛloke
draṣṭuṁ tvadanyena kurupravīra 48

mā te vyathā mā ca vimūḍhabhāvaḥ
dṛṣṭvā rūpaṁ ghoramīdṛṅmamedam
vyapetabhīḥ prītamanāḥ punastvam
tadeva me rūpamidaṁ prapaśya 49

sañjaya uvāca
ityarjunaṁ vāsudevastathoktvā
svakaṁ rūpaṁ darśayāmāsa bhūyaḥ
āśvāsayāmāsa ca bhītamenam
bhūtvā punaḥ saumyavapurmahātmā 50

arjuna uvāca
dṛṣṭvedaṁ mānuṣaṁ rūpam
tava saumyaṁ janārdana
idānīmasmi saṁvṛttaḥ
sacetāḥ prakṛtiṁ gataḥ 51

śrībhagavānuvāca
sudurdarśamidaṁ rūpam
dṛṣṭavānasi yanmama
devā apyasya rūpasya
nityaṁ darśanakāṅkṣiṇaḥ 52

nāhaṁ vedairna tapasā
na dānena na cejyayā
śakya evaṁvidho draṣṭum
dṛṣṭavānasi māṁ yathā 53

bhaktyā tvananyayā śakyaḥ
ahamevaṁvidho'rjuna
jñātuṁ draṣṭuṁ ca tattvena
praveṣṭuṁ ca paraṁtapa 54

matkarmakṛnmatparamaḥ
madbhaktaḥ saṅgavarjitaḥ
nirvairaḥ sarvabhūteṣu
yaḥ sa māmeti pāṇḍava 55

*om tatsaditi śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde viśvarūpadarśanayogo nāma ekādaśo'dhyāyaḥ.*